# 2024

## SANSKRIT — GENERAL

**Paper : SEC-A-2**

**(Basic Elements of Āyurveda)**

**Full Marks : 80**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

1. अधोलिखितेषु यथेच्छं ***पञ्चप्रश्नाः*** संस्कृतभाषया देवनागरलिप्या च समाधेयाः। 2×5

   (a) आयुर्वेदे प्रसिद्धयोः कयोश्चिद् द्वयोः संहिताग्रन्थयोः नाम लिख्यताम्।

   (b) आयुर्वेदस्य कति विभागाः सन्ति? तेषां मध्ये कयोश्चिद् द्वयोः नाम लिख्यताम्।

   (c) सुश्रुतसंहितायां कति अध्यायाः सन्ति? तेषु द्वयोः नाम लिख्यताम्।

   (d) चरकसंहितायाः कति विभागाः कति अध्यायाश्च सन्ति?

   (e) भैषज्यसूक्तं कुत्र उपलभ्यते? सुक्तस्यास्य प्रतिपाद्यः विषयः उल्लेखनीयः।

   (f) वाजीकरणं किम्? अङ्गस्यास्य कस्यचिद् वैद्यस्य नाम लेख्यम्।

   (g) 'कुमारतन्त्रम्', 'भेषजकल्पः' इति ग्रन्थद्वयस्य लेखकयोः नामोल्लेखः कार्यः।

   (h) आयुर्वेदशास्त्रस्य बृहत्त्रयी का?

   (i) नागार्जुनरचितस्य ग्रन्थद्वयस्य नाम लिख्यताम्।

   (j) चक्रपाणिदत्तेन विरचितयोः द्वयोः आयुर्वेदीयग्रन्थयोः नाम लिख्यताम्।

2. अधोलिखितेषु कयोश्चिद् ***द्वयोः*** परिचयो देयः। 5×2

   (a) माधवः

   (b) जीवकः

   (c) सुश्रुतः

   (d) धन्वन्तरिः।

3. अधोलिखितेषु श्लोकेषु केषाञ्चित् ***त्रयाणां*** वङ्गभाषया आङ्गलभाषया वा अनुवादः कर्तव्यः। 5×3

(a) धर्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम्।
रोगग्रस्तापहर्तारं श्रेयसो जीवितस्य च॥

(b) तस्यायुषः पुण्यतमो वेदो वेदविदां मतः।
वक्ष्यते यन्मनुष्याणां लोकयोरुभयोर्हितम्॥

(c) संयोगे च वियोगे च कारणं द्रव्यमाश्रितम्।
कर्तव्यस्य क्रिया कर्म कर्म नान्यदपेक्षते॥

(d) दीर्घं जीवितमन्विच्छन् भरद्वाज उपागमत्।
इन्द्रमुग्रतया बुद्धा शरण्यममरेश्वरम्॥

(e) ब्रह्मणा हि यथाप्रोक्तमायुर्वेदं प्रजापतिः।
जग्राह निखिलेनादावश्विनौ तु पुनस्ततः॥

4. अधोलिखितेषु कस्य***चिदेकस्य*** श्लोकस्य संस्कृतभाषया देवनागरलिप्या च व्याख्या कार्या। 7×1

(a) हिताहितं सुखं दुःखमायुस्तस्य हिताहितम्।
मानञ्च तच्च यत्रोक्तमायुर्वेदः स उच्यते॥

(b) शरीरेन्द्रियसत्त्वात्मसंयोगो धारि जीवितम्।
नित्यगश्चानुबन्धश्च पर्यायैरायुरुच्यते॥

(c) सर्वमन्यत् परित्यज्य शरीरमनुपालयेत्।
तदभावे हि भावानां सर्वभावः शरीरिणाम्॥

5. अधोलिखितेषु ***द्वयोः*** टीका संस्कृतभाषया देवनागरलिप्या च लेखनीया। 4×2

(a) आयुर्वेदसम्मतं पञ्चकर्म।

(b) साध्यरोगः।

(c) आयुर्वेदे द्रव्यभेदाः।

(d) आयुर्वेदे 'चिकित्सा'।

(e) आयुर्वेदे 'वैद्यः'।

6. निम्नोद्धृतान् प्रश्नस्थितान् मन्त्रान् विहाय तैत्तिरीयोपनिषदः स्वाभिमतं यथेच्छं **कमप्येकं** मन्त्रं देवनागरलिप्या लिखत। 10

7. अधोलिखितेषु कयोश्चिद् ***द्वयोः*** मन्त्रयोः वङ्गभाषया आङ्गलभाषया वा अनुवादः कर्तव्यः। 5×2

(a) प्राणं देवा अनु प्राणन्ति। मनुष्याः पशवश्च ये।
प्राणी हि भूतानामायुः। तस्मात्सर्वायुषमुच्यते।

(b) शं नो मित्रः शं वरुणः। शं नो भवत्वर्यमा।
शं न इन्द्रो बृहस्पतिः। शं नो विष्णुरुरुक्रमः।
नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि।
त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि। ऋतं वदिष्यामि।
सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु।
अवतु माम्। अवतु वक्तारम्॥

(c) यतो वाचो निवर्तन्ते अप्राप्य मनसा सह।
आनन्दं ब्रह्मणो विद्वान् न बिभेति कदाचन॥

8. तैत्तिरीयोपनिषदः शीक्षावल्लीभागे समालोचितविषयाणां संस्कृतभाषया देवनागरलिप्या च संक्षेपेण विवरणं देयम्। 10

***अथवा,***

संस्कृतभाषया देवनागरलिप्या च अधोलिखितयोः अन्यतरस्य सप्रसङ्गं व्याख्या कार्या। 10×1

(a) रसो वै सः। रसं ह्येवायं लब्ध्वानन्दी भवति।

(b) ब्रह्मविदाप्नोति परम्। तदेषाभ्युक्ता। सत्यं ज्ञानमनन्तं ब्रह्म। यो वेद निहितं गुहायां परमे व्योमन्। सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति।

---